योगवासिष्ठः/प्रकरणम्‌ ६ (निर्वाणप्रकरणस्य उत्तरार्धम्)/सर्गः ०८८

वाल्मीकिः

अष्टाशीतितमः सर्गः ८८

श्रीवसिष्ठ उवाच ।

भूपीठेन सता तत्र मया तदनु मानव ।

अनुभूतं नदनदीस्वसंवेदनसंस्थितेः ।। १

क्वचिन्मरणसाक्रन्दनारीकरुणवेदनम् ।

क्वचिदुत्ताण्डवस्त्रैणमहोत्सवमहासुखम् ।। २

क्वचिद्दुर्वारदुर्भिक्षदुराक्रन्दं दुरीहितम् ।

क्वचित्सकलसस्यौघसंपन्नघनसौहृदम् ।। ३

क्वचिदग्निमहादाहदग्धदेहोग्रवेदनम् ।

क्वचिज्जलप्लवालूनपुरपत्तनखण्डकम् ।। ४

क्वचिच्चपलसामन्तकृतलुण्ठनमण्डलम् ।

क्वचिदुद्दामदौरात्म्यरक्षःपैशाचमण्डलम् ।। ५

क्वचिज्जलाशयोल्लासवेल्लनोत्पुलकाग्रकम् ।

कन्दरोदरनिष्क्रान्तवातवेल्लितवारिदम् ।। ६

संविद्बोधोन्नमत्स्वाङ्गकेशोत्थाङ्कुरलोमकम् ।

वारिवाहनविक्षोभनतोन्नतलसत्तलम् ।। ७

सशृङ्गभैरवश्वभ्रपुराद्रिवनपत्तनम् ।

संविन्मण्डलसंचाललेखाङ्कमृदुकम्पनम् ।। ८

क्वचित्सामन्तसंक्षुब्धसैन्यसंहरणं रणे ।

क्वचित्सौम्यसुखासीनसर्वसामन्तमण्डलम् ।। ९

अरण्यं क्वचिदाशून्यमुल्लसद्वातझंकृति ।

जंगलं क्वचिदालूनव्युप्तसंपन्नसस्यकम् ।। 6.2.88.१०

हंसकारण्डवाकीर्णसरः फुल्लाम्बुजं क्वचित् ।

क्वचिन्मरुस्थलस्थूलस्तम्भनार्जुनमारुतम् ।। ११

क्वचिन्नदनदीवाहहेलानिकषघर्घरम् ।

क्वचिदङ्कुरकार्याङ्गसिक्तबीजस्य जृम्भणम् ।। १२

क्वचिदन्तस्तु कीटास्यमृदुस्पन्दनवेदनम् ।

मां त्वमेवाशु बुद्ध्वेह त्रायस्वेतीव बोधनम् ।। १३

शाखापरिकराभोगं मृद्धागाङ्गनिपीडनैः ।

मूलजालमवष्टभ्य क्वचिद्विटपधारिणम् ।। १४

अन्योन्यमलमाक्रम्य दित्तटाङ्गनिपीडनैः ।

क्वचिदद्र्य(?)स्थिनिबिडैरर्णवोल्लासवेल्लितम् ।। १५

शुष्कपल्लवसंकोचनिबिडाङ्गनिपीडनम् ।

अमर्षणैः करैरार्कैः स्वरसाकर्षणं क्वचित् ।। १६

शृङ्गमन्दिरमातङ्गप्रहाराशनिभूरुहाम् ।

निबिडाङ्गोत्कटस्थैर्यपरुषापतनं क्वचित् ।। १७

निमीलितैक्षणानन्दतनूनामसमाक्रमम् ।

क्वचित्सूक्ष्मतरोल्लेखमङ्कुरोल्लासनं नवम् ।। १८

मक्षिकायौकमशकनिवाससदृशं क्वचित् ।

कुड्यलेशकुभृङ्गारिहलहेलानिकर्षणम् ।। १९

शीतं शीतविशीर्णाङ्गजर्जरत्वग्विकीर्णवत् ।

पाषाणीभूतसलिलं क्वचित्परुषमारुतम् ।। 6.2.88.२०

उद्दालीभूतमृद्वङ्गमज्जदन्तःकृमिव्रजम् ।

क्वचिदुद्भवदङ्गादिमूलं जलनिमज्जनम् ।। २१

शनैरन्तर्निलीनाम्बुकृताह्लादं बहिश्च र-

-सोन्नामाङ्कुररोमौघं क्वचिद्वर्षविजृम्भितम् ।। २२

तनुतरपवनविकम्पितकोमलनलिनीदलास्तरणैः ।

विहरणमिव मे विहितं सरोभिरङ्गेषु निर्वाणम् ।।

इत्यार्षे श्रीवासिष्ठमहा० वाल्मी० दे० मो० निर्वाणप्रकरणे उ० पाषा० भूमण्डलगतविशेषवर्णनं नामाष्टाशीतितमः सर्गः ।।८ ८ ।।